गर्द्द, क निकेतने। कूर्हे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, गर्द्दयति। इति दुर्गादासः॥

गर्द्द, ङ कूर्हे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ङ, गर्द्दते। इति दुर्गादासः॥

गृवाकः, पुं, (गुवति पुरीषमुत्सृजत्यनेन यद्वा गुवति बहुलभक्षणेन सुखविवरात् पुरीषवद्गत्-सृजतीति। गुप्रि. विलोत्सर्गे+"पिनाकादयश्च।" उणां। ४। १५। इति आकः। कुटादित्वाद्गुणाभावः। निपातनात् दीर्घत्वम्।) गुवाकः। इति शब्दरत्नावली॥

गूषणा, स्त्री, (भूषयतीति। निपातनात् भकारस्य गत्वम्।) मयूरचन्द्रकः। मयूरपिच्छचक्रम्। इति शब्दचन्द्रिका॥

गृ, सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) गरति तरुं मेघः। इति दुर्गादासः॥

गृज, ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) सप्तमस्वरी गर्ज्जति। इति दुर्गादासः॥ (यथा, पूर्व्वचातकाष्टके। ४।

"गर्ज्जसि मेघ! न यच्छसि तोयं
चातकपक्षी व्याकुलितोऽहम्।
दैवादिह यदि दक्षिणवातः
क्व त्वं क्वाहं क्व च जलपातः॥")

गृज, इ ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) सप्तमस्वरी। इ, गृञ्जति। इति दुर्गादासः॥ (ध्वनिरिह कथनमिति मत्वा केचित् सकर्म्मकमपि वदन्ति॥)

गृञ्जनं, क्ली, (गृञ्जाते अभक्ष्यत्वेन कथ्यते प्राण-नाशकत्वादिति। गृजि ध्वनौ+कर्म्मणि ल्युट्।) विषदिग्धपशोर्मांसम्। इति मेदिनी। ने। ५८॥ (गृञ्जाति रोगनाशकतया भक्ष्यत्वेन कथ्यते इति।) मूलविशेषः। सलगम इति ख्यातः। तत्पर्य्यायः। शिखिमूलम् २ यवनेष्टम् ३ वर्त्तुलम् ४ ग्रन्थिमूलम् ५ शिखाकन्दम् ६ कन्दम् ७ डिण्डीरमोदकम् ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातरोगगुल्मनाशित्वम्। रुच्यत्वम्। दीपनत्वम्। हृद्यत्वम्। दुर्गन्धत्वञ्च। इति राजनिर्घण्टः॥

गृञ्जनः, पुं, (गृञ्जाते अभक्ष्यत्वेन कथ्यते इति। गृजि+ल्युट्।) रसोनकः। रसुन इति भाषा। इति मेदिनी। ने। ५८॥ रक्तलशुनः। इति राजनिर्घण्टः॥ (अस्य अभक्षणीयत्वमुक्तं यथा, मनौ। ५। १९—२०।

"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः॥
अमत्यैतानि षड्जग्ध्वा कृच्छ्रं सान्तपनञ्चरेत्।
यतिचान्द्रायणं वापि शेषेषूपवसेदहः॥")

गृञ्जीवः, पुं, एणुगृगालः। बड़ शेयाल इति भाषा। तत्पर्य्यायः। लोपाकः २। इति हेमचन्द्रः। ४। ३५७॥ (गृज्जिवोऽपि पाठः॥)

गृतसः, पुं, (गृध्यति लिप्सत्यनेनेति। गृध अभिकाङ्क्षायाम्+"गृधिपण्योर्दकौ च।" उणां। ३। ६९। इति सः स च कित् दकारान्तादेशश्च।) कन्दर्पः। इत्युणादिकोषः॥ (त्रि, स्तुत्यः। यथा, ऋग्वेदे। ७। ८७। ५।

"गृत्सो राजा वरुणश्चक्र एतं दिविप्रेङ्खम्।"
"गृत्सः स्तुत्यः।" इति भाष्यम्॥)

गृध, इर् य उ लिप्से। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट् क्त्वावेट्।) इर्, अगृधत् अगर्धीत्। यस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। य, गृध्यति धनं लुब्धः। उ, गर्द्धित्वा गृद्धा। इति दुर्गादासः॥

गृधुः, पुं, (गृध्यत्यनेनास्माद्वा इति। गृधय इर लिप्सायाम्+"पृभिदिव्यधिगृधिधृषिहृषिभ्यः।" उणां। १। २३। इति कुः।) कामदेवः। इत्युणादिकोषः॥ (गृध्यति अभिलषतीति विग्रहे वाच्यलिङ्गत्वात्।) अभिलाषुकः। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृधूः, पुं, (गृध+बाहुलकात् कूः।) बुद्धिः। अपानम्। कुत्सितम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृध्नुः, त्रि, (गृध्यति कामयते लिप्सति वा धनमिति शेषः। गृध+त्रसिगृधिधृषिक्षिपेः क्नुः।" ३। २। १४०।। इति क्नुः।) लुब्धः। इत्यमरः। ३। १। २१॥ (यथा, भागवते। ३। १४। २०।

"न वयं प्रभवस्तां त्वामनुकर्त्तुं गृहेश्वरि!।
अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः॥"
क्वचित् गृध्नोऽपि पाठः॥)

गृध्नुता, स्त्री, (गृध्नोर्भावः इति तल्।) लुब्धता। तत्पर्य्यायः। रागः २ सङ्गः ३। इति त्रिकाण्डशेषः॥

गृध्रः, पुं, (गृध्यति अभिकाङ्क्षति मांसानीति। "सुसूधाञ्गृधिभ्यः क्रन्।" उणां। २। २४। इति क्रन्।) पक्षिविशेषः। गृधिनी शकुनी इति च भाषा। तत्पर्य्यायः। दाक्षाय्यः २ वज्रतुण्डः ३ दूरदर्शनः ४। इति राजनिर्घण्टः॥ (यथा, महाभारते। ६। ३। ३१।

"गृध्रः संपतते शीर्षे जनयन् भयमुत्तमम्॥"
इह लोके लोभवशात् यस्तु देवब्राह्मणस्वं हरति स पापात्मा परत्र गृध्रोच्छिष्टेनोपजीवति। यथाह मनुः। ११। २६।

"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥")

गृध्रनखी, स्त्री, (गृध्रस्य नख इवाकारोऽस्त्यस्याः इति। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। ततो ङीष्।) कुलिकण्टकः। इति रत्नमाला॥ कालियाकड़ा इति भाषा। (यथा, सुश्रुते सूत्रस्थाने। ३८ अध्याये।

"करमर्द्दत्रिकण्टकसैरीयकशतावरीगृध्रनख्य इति कण्टकसंज्ञः॥") कोलिदृक्षः। इति त्रिकाण्डशेषः॥

गृध्रपत्रा, स्त्री, (गृध्रस्य पत्रमिव पत्त्रवदित्यर्थः पत्रमस्याः। गृध्र इव धूम्रवर्णं पत्रमस्या इत्येके।) धूम्रपत्राक्षुपः। इति राजनिर्घण्टः॥

गृध्रराजः, पुं, (गृध्रः राजा इवेत्युपमितसमासः। गृध्राणां राजेति वा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) जटायुपक्षी। यथा,—

"भूयः कनकपृष्ठाग्रै रक्षो वाणैरजिह्मगैः।
निर्बिभेद सुतीक्ष्णाग्रैर्गृध्रराजं शिलाशितैः॥"
इति रामायणम्॥

गृध्रसी, स्त्री, (गृध्यति मांसमभिकाङ्क्षति सततं इति गृध+क्रन्। गृध्रो मांसलोलुपो मनुष्यः तं स्यति पीड़यति नाशयति वा। सो+कः ङीष्।) वातरोगविशेषः। तल्लक्षणं यथा,—

"स्फिक्पूर्व्वा कटीपृष्ठजानुजङ्घापदं क्रमात्।
गृध्रसी स्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः॥
वाताद्वातकफाभ्यां सा विज्ञेया द्विविधा पुनः।
वातजायां भवेत्तोदो देहस्यातीववक्रता॥
जानुजङ्घोरुसन्धीनां स्फुरणं स्तम्भता भृशम्।
वातश्लेष्मोद्भवायान्तु गौरवं वह्निमार्द्दवम्॥
तन्द्रा मुखप्रसेकश्च भक्तद्वेषस्तथैव च॥"
गृध्रसीवातात् केवलात् स्फिगादिपर्य्यन्तं स्तम्भरुक् तोदैर्गृह्णाति। क्रमात् इति क्रमात्। तेन यथा यथा वर्द्धते तथा तथा स्फिगादीन्याक्रामति नात्र गृध्रस्यां निर्द्दिष्टक्रमनियमः। तथा मुहुः स्पन्दते स्फिगादिषु शिराकम्पं करोतीत्यर्थः॥*॥

अथ तस्याश्चिकित्सा।

"गृध्रस्यान्तु नरं सम्यक् रेकेण वमनेन वा।
ज्ञात्वा निरामं दीप्ताग्निं वस्तिभिः समुपाचरेत्॥
नादौ वस्तिविधिं कुर्य्याद्यावदूर्द्ध्वं न शुध्यति।
स्नेहो निरर्थकः स स्याद्भस्मन्येव हुतो यथा॥*॥
तैलमेरण्डजं प्रातर्गोमूत्रेण पिबेन्नरः।
मासमेकं प्रयोगोऽयं गृध्रस्यान्तु महापहः॥ १॥
तैलं घृतं सार्द्रकमातुलुङ्ग-
रसं सचुक्रं सगुड़ं पिबेद्वा।
कट्यूरुपृष्ठत्रिकशूलगुल्म-
गृध्रस्युदावर्त्तहरः प्रयोगः॥ २॥
निष्कुष्यैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत्।
तत्पायसं कटीशूले गृध्रस्यां परमौषधम्॥ ३॥
एरण्डमूलं बिल्वञ्च बृहती कण्टकारिका।
कषायो रुचकोपेतः पीतो वृषणवस्तिजम्॥
गृध्रसीजं हरेच्छूलं चिरकालानुबन्धि च॥"
रुचकं सौवर्च्चलम्॥ ४॥
"गोमूत्रैरण्डतैलाभ्यां कृष्णाचूर्णं पिबेन्नरः।
दीर्घकालोत्थितां हन्ति गृध्रसीं कफवातजाम्॥५॥
सिंहास्यदन्तीकृतमालकानां
पिबेत् कषायं रुबु-तैलमिश्रम्।
यो गृध्रसीनद्धगतिः प्रसन्नः
स शीघ्रगः स्याद्धि किमत्र चित्रम्॥ ६॥
इङ्गुदीत्वक्तरोः सारो वारिणा परिपेषितः।
स पीतो नाशयेत् क्षिप्रमसाध्यामपि गृध्रसीम्॥७॥
शेफालिकादलैः क्वाथो मृद्वग्निपरिपाचितः।
दुर्व्वारं गृध्रसीरोगं पीतमात्रः प्रणाशयेत्॥"
शेफालिकानिर्गुण्डी॥ ८॥
"रास्नायास्तु पलञ्चैकं पञ्च कर्षाणि गुग्गुलोः।
सर्पिषा वटिकां कृत्वा भक्षयेद् गृध्रसीहरीम्॥"